पुक्कशः, पुं, (पुक् कुत्सितं कशतीति । कश गतौ + अच् ।) चण्डालः । इत्यमरटीकायां भरतः ॥

पुक्कसः, पुं, (पुक् कुत्सितं कसतीति । कस गतौ + अच् ।) चण्डालः । (स तु निषादात् शूद्रायां जातः । यथा, मनुः । १० । १८ ।
"जातो निषादात् शूद्रायां जात्या भवति पुक्कसः ॥")
अधमे, त्रि । इति मेदिनीशब्दरत्नावल्यौ ॥

पुक्कसी, स्त्री, कालिका । नीली । इति मेदिनी-शब्दरत्नावल्यौ ॥ (पुक्कस + जातौ ङीष् । पुक्कस-स्त्रीजातिः । यथा, मनुः । १० । ३८ ।
"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥")

पुङ्खः, पुं, (पुमांसं खनतीति । खन + डः ।) काण्ड-मूलम् । इत्यमरः । ३ । ५ । १७ ॥ पुष्कल इति ख्यातम् ॥ (अर्द्धर्चादित्वात् क्लीवलिङ्गोऽपि ॥ यथा, रघुः । २ । ३१ ।
"सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे ॥"
मङ्गलाचारः । इति हेमचन्द्रटीका ॥)

पुञ्जः, पुं, क्ली, (पुञ्ज + पृषोदरादित्वात् साधुः ।) समूहः । इति शब्दचन्द्रिका ॥

पुङ्गलः, पुं, (पुङ्गं देहसमूहं लाति आदत्ते इति । पुङ्ग + ला + कः ।) आत्मा । इति भूरि-प्रयोगः ॥

पुङ्गवः, पुं, (पुमान् गौः । "गोरतद्धितलुकि ।" ५ । ४ । ९२ । इति टच् ।) वृषः । (यथा, हरिवंशे । ७५ । ४१ ।
"भवता रचिता लोका गोलोकश्च महालयम् ।
यद्वयं पुङ्गवैः सार्द्धं वर्द्धामः प्रसवैस्तथा ॥")
औषधभेदः । (पुमान् गौरिव महत्त्वाद्याति-शय्यादित्युपमितसमासः ।) उत्तरपदस्थः श्रेष्ठ-वाचकः । इति मेदिनी । वे, ४४ ॥ (यथा, भाग-वते । १ । ६ । १२ ।
"इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि ॥")
ऋषभौषधम् । महोक्षः । इति राजनिर्घण्टः ॥

पुच्छ, प्रमादे । इत्यमरटीकायां रायमुकुटधृत-धातुः ॥ (भ्वा-परं-अकं-सेट् ॥)

पुच्छः, पुं,क्ली, (पुच्छतीति । पुच्छ प्रमादे + अच् ।) लाङ्गूलम् । इत्यमरः ।२।८।५०॥ (यथा, देवी-भागवते । ५ । ७ । २६ ।
"खुरघातैस्तथा देवान् पुच्छस्य भ्रमणेन च ।
स जघान कृपाविष्टो महिषः परमाद्भुतः ॥")
मयूराङ्गे, पुं । इति मेदिनी । छ, ५ ॥ (यथा, महाभारते । ७ । ६ । २८ ।
"उल्का ज्वलन्ती संग्रामे पुच्छेनावृत्य सर्व्वशः ॥")
लोमवल्लाङ्गूले कलापे च, क्ली । इत्युणादिकोषः ॥

पुच्छटि, स्त्री, (पुच्छ प्रमादे + भावे क्विप् । पुच्छं प्रमादं अटतीति । अट गतौ + इन् ।) अङ्गुलि-मोटनम् । इति त्रिकाण्डशेषः ॥ आङ्गुलमट्-काण इति भाषा ॥

पुच्छदा, स्त्री, (पुच्छमिव ददातीति । दा + कः ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

पुच्छी, [न्] पुं, (पुच्छोऽस्त्यस्येति । पुच्छ + इनिः ।) अर्कवृक्षः । इति राजनिर्घण्टः ॥ कुक्कुटः । इति शब्दचन्द्रिका ॥ लाङ्गूलयुक्ते, त्रि ॥

पुञ्जः, पुं, (पिञ्जते पिञ्जयतीति वा । पिजि + अच् । पृषोदरादित्वात् साधुः ।) समूहः । राशिः । इत्यमरः । २ । ५ । ४२ ॥ (यथा, मार्कण्डेये । ८ । ८२ ।
"गृहीतपक्षिपुञ्जश्च शवमाल्यैरलङ्कृतः ॥")

पुट, क चूर्णे । भाषि । इति कविकल्पद्रुमः ॥ (चुरां-परं-चूर्णे सकं-भासि अकं-सेट् ।) क, पोटयति । भासि दीप्तौ । इति दुर्गादासः ॥

पुट, त क संसर्गे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) पुटयति पुष्पं सूत्रेण जनः संसृजतीत्यर्थः । इति दुर्गादासः ॥

पुट, श्रि श्लेषे । इति कविकल्पद्रुमः ॥ (तुदां-कुटां-परं-अकं-सेट् ।) श्रि, पुटति अपुटीत् पुपोट । श्लेषः सम्बन्धीभावः । इति दुर्गादासः ॥

पुटं, क्ली, (पुटतीति । पुट संश्लेषे + कः ।) जाती-फलम् । इति राजनिर्घण्टः ॥ उपर्य्यधोभावा-पन्नसंयुक्तमृदादिकपालद्वयरूपौषधपाकपात्रम्। धात्वादिमारणोपयुक्तान् पुटप्रकारानाह रस-प्रदीपे ।
"लोहादेरपुनर्भावस्तद्गुणत्वं गुणाढ्यता ।
सलिले तरणञ्चापि तत्सिद्धिः पुटनाद्भवेत् ॥
गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके ।
वनोपलसहस्रेण पूरिते पुटनौषधम् ॥
कोष्ठे रुद्धं प्रयत्नेन गोविष्ठोपरि धारयेत् ।
वनोपलसहस्रार्द्धं कोष्ठिकोपरि निःक्षिपेत् ॥
वह्निं विनिःक्षिपेत्तत्र महापुटमिति स्मृतम् ॥१॥
कोष्ठं मूषा । गोविष्ठा गोइठा । इति महापुटम् ॥
सपादहस्तमानेन कुण्डे निम्ने तथायते ।
वनोपलसहस्रेण पूर्णमध्ये विधारयेत् ॥
पुटनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे ।
अधोऽर्द्धानि करण्डानि अर्द्धान्युपरि निःक्षिपेत् ॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्व्वपुटोत्तमम् ॥
हस्तश्चतुर्व्विंशत्यङ्गुलप्रमाणः स सपादः तेन त्रिंशदङ्गुलप्रमाणेनेत्यर्थः । अतएवोक्तम् ।
साधारणो नराङ्गुल्या त्रिंशदङ्गुलको गजः ॥
इति गजपुटम् ॥ २ ॥
अरत्निमात्रके कुण्डे पुटं वाराहमुच्यते ॥ ३ ॥
वितस्तिमात्रके खाते कथितं कौक्कुटं पुटम् ।
'अरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमरः । २ । ६ । ८६ ॥ निःसृतकनिष्ठया मुष्ट्योपलक्षितो हस्तोऽरत्निरित्यर्थः ।
षोड़शाङ्गुलके खाते कस्यचित् कौक्कुटं पुटम् ॥ ४ ॥
यत् पुटं दीयते खाते ह्यष्टसंख्यैर्वनोपलैः ।
कपोतपुटमेतत्तु कथितं पुटपाकिभिः ॥ ५ ॥
गोष्ठान्तर्गोखुरक्षुण्णं शुष्कचूर्णितगोमयम् ।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने ॥
इष्टद्रव्याच्छ्रितैर्यत्र गोवरैर्दीयते पुटम् ।
तद्गोवरपुटं प्रोक्तं भिषग्भिः सूतभस्मसात् ॥६॥
इष्टकाखण्डे तुषैः पूर्णे मध्ये मूषां विधारयेत् ।
चिमृाग्निं मुद्रयेत्ताखं तद्भाण्डपुटमुच्यते ॥"*॥
इति भावप्रकाशे पूर्व्वखण्डे २ भागः ॥

पुटः, पुं क्ली, (पुटतीति । पुट श्लेषे + कः ।) अश्व-खुरः । इति शब्दरत्नावली ॥

पुटः, त्रि, (पुट् + कः ।) आच्छादनम् । पत्रादि-रचितः पुष्पाद्याधारः । यथा, रघुः । २ । ६५ ।
"दुग्ध्वा पयः पत्रपुटे मदीयं
पुत्रोपभुङ्क्ष्वेति तमादिदेश ॥"
(यथा च मनौ । ६ । २८ ।
"ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥")
मिथःसंश्लेषः । इति सुकुटः ॥ इत्यमरटीकायां भरतः ॥

पुटकं, क्ली, (पुटवत् कायतीति । कै + कः ।) पद्मम् । इति शब्दरत्नावली ॥ स्वार्थे कप्रत्यये पुटशब्दार्थोऽप्यत्र ॥

पुटकन्दः, पुं, (पुटमिव कन्दो यस्य ।) कोलकन्दः । इति राजनिर्घण्टः ॥

पुटकिनी, स्त्री, (पुटकानि सन्त्यत्रेति । पुटक + "पुष्करादिभ्यो देशे ।" ५ । २ । १३५ । इति इनिः । स्त्रियां ङीप् ।) पद्मिनी । पद्मयुक्तदेशः । पद्मसमूहः पद्मलता च । इति हेमचन्द्रः ॥

पुटग्रीवः, पुं, (पुटमिव ग्रीवा यस्य ।) गर्गरी । ताम्रकुम्भः । इति मेदिनी । वे, ६१ ॥

पुटपाकः, पुं, (पुटेन पाकः ।) पुटाभ्यन्तरितौ-षधपचनम् । अथ पुटपाकविधिः ।
"पुटपाकस्य कल्कस्य स्वरसो गृह्यते यतः ।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता ।
लेपञ्च द्व्यङ्गुलं स्थूलं कुर्य्याद्द्व्यङ्गुलिमात्रकम् ॥
काश्मरीवटजम्ब्वादिपत्रैर्वेष्टनमुत्तमम् ।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत् ॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः ॥
अपि च ।
द्वे बिल्वे स्निग्धमांसस्य परं द्रव्यं पलं मतम् ।
द्रवस्य कुड़वोन्मानं सर्व्वमेकत्र पेषयेत् ॥
तदेकत्र समालोड्य पत्रैः सुपरिवेष्टितम् ॥
पुटपाकविधानेन तत् पक्त्वा तद्रसं बुधः ।
तर्पणोक्तेन विधिना यथावदवचारयेत् ॥
दृष्टिमध्ये निषेच्यः स्यान्नित्यमुत्तानशायिनः ।
स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा ॥
हितः स्निग्धो विरूक्षस्य स्निग्धस्य स तु लेखनः ।
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत् ॥
इतरो रोपणः ।
स्नेहमांसवसामज्जमेदःस्वाद्वौषधैः कृतः ।
स्नेहनः पुटपाकः स्याद्धार्य्यो द्वे वाक्शते तु सः ॥
वाक्शतं छोटिकाशतम् ।
जाङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंयुतैः ।
कृष्णलोहरजस्ताम्रशङ्खविद्रुमसिन्धुजैः ॥
समुद्रफेनकासीसस्रोतोजदधिमस्तुभिः ।